National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2016; 1(7): 80-83
© 2016 NJHSR
www.sanskritarticle.com

**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# श्रीमदय्यप्पगीतायाः माहात्म्यम्

**आचार्यः जि. पद्मनाभम्**

**सारांशः -** अस्मिन् शोधपत्रे भगवतः अय्यप्पस्वामिनः उपदेशात्मिकायाः **"श्रीमदय्यप्पगीतायाः"** आध्यात्मिकं शास्त्रीयञ्च महत्त्वं प्रतिपादितम् अस्ति । यथा महाभारते श्रीकृष्णार्जुनसंवादः 'भगवद्गीता' इति प्रसिद्धः, तथैव अय्यप्पस्वामिनः शबर्याः च संवादरूपेण अष्टादशाध्यायात्मिका 'अय्यप्पगीता' अच्युतानन्दस्वामिना विरचिता । लेखकः अत्र प्रतिपादयति यदेषा गीता अद्वैततत्त्वस्य अमृतवर्षिणी अस्ति। अय्यप्पस्वामी 'हरिहरपुत्रः' इति कारणादत्र शिवविष्णवोः अभेदः (Advaita) मुख्यतया वर्णितः। लेखे नवविधायाः भक्तेः (श्रवण-कीर्तनादि) विवेचनं कृतम् अस्ति, यत्र शरणागतिः एव मोक्षस्य सरलतमः उपायः इति दर्शितम् । ओङ्कारस्य (Pranava) महिमा, वेदानां प्रामाण्यं, तथा च 'सोऽहम्' इति अद्वैतभावस्य उपदेशः अस्याः गीतायाः सारः अस्ति। अन्ते **'शासनात्् शास्त्रम्'** इति व्युत्पत्त्या अय्यप्पगीतायाः शास्त्रत्वं सिद्धं कृतम् ।

**कूटशब्दाः - हरिहरपुत्रः** (विष्णुशिवयोः समाहाररूपः अय्यप्पः), **शबरी-अय्यप्प-संवादः** (अस्याः गीतायाः आधारः), **नवविधा भक्तिः** (श्रवण-कीर्तनादयः ९ प्रकाराः), **शरणागतिः** (परमशान्तेः मोक्षस्य च उपायः), **अद्वैतामृतवर्षिणी** (अभेददर्शनकारिणी), **ओङ्कारः/प्रणवः** (एकाक्षरं ब्रह्म), **सोऽहम् भावः** (नाहं देही, अहम् आत्मस्वरूपः), **चतुर्वर्गपुरुषार्थः** (धर्म-अर्थ-काम-मोक्षाः), **अद्वैततत्त्वम्** (विष्णुमयः शिवः, शिवमयो विष्णुः), **शरणमय्यप्प** (अय्यप्पभक्तानां महामन्त्रः) ।

शबरीमलै इति प्रसिद्धे सह्याद्रौ अय्यप्पस्वामिदेवालयः प्रसिद्धः। अय्यप्पस्वामी च हरिहरपुत्र इति पुराणप्रसिद्धम्। प्रतिवर्षं भक्तजनाः लक्षशः तत्र सेवार्थं गच्छन्ति। अय्यप्पं शरणं गच्छन्ति। कार्तीकपौर्णमासीतः मकरमासं यावत् यात्राव्याजेन सर्वे तत्र गच्छन्ति। भक्तिपरवशाः सन्तः तद्भजनेनाभीष्टं प्राप्नुवन्ति। अय्यप्पस्वामिनः शबर्याश्च संवादरूपेण प्रवृत्तो शबरीं प्रति अय्यप्प-कर्तृकोपदेशरूपा भगवद्गीतावत् अष्टादशाध्यायात्मिका अय्यप्पगीता अच्युतानन्दकृता संस्कृतश्लोकरूपा अष्टादशसु अध्यायेषु अय्यप्पयोगः, शास्त्रयोगः, अध्यात्मयोगः, भक्तियोगः, ज्ञानविज्ञानयोगः, विरागयोगः, विचारयोगः, निर्ममयोगः, मन्त्रयोगः, धर्मयोगः, कर्मयोगः, गुणयोगः, ब्रह्मदर्शनयोगः, अमरासुर- सम्पद्विभागयोगः, विश्वासयोगः, भूमिकायोगः, शरणागतियोगः, अय्यप्पदर्शनयोगः इति अष्टादशविषयाः प्रतिपादिताः। अय्यप्पं प्रति सश्रद्धं क्रियमाणा शरणागतिः परमशान्तिरूपमोक्षसाधनमिति निगमनं क्रियतेऽत्र -

**"तमेव शरणं गच्छ सर्वभावेन भामिनि ।**

**तत्प्रसादात्परां शान्तिमचिरेणाधिगच्छति ॥**[1] **इति ।।**

अत एव 'शरणमय्यप्प' इति घोषणं कुर्वन्तो जनाः तं शरणमुपयान्ति ।

**अय्यप्पगीतायाः आविर्भावः**

हिन्दूमतस्य परमप्रमाणः वेद एव । प्रप्रथमं स एक एव। अपि च केचन मन्दबुद्धयः तं अवगन्तुं अशक्ताः

अभवन्। तदर्थं अल्पायुषां कलियुग प्रजानां उपयोगार्थं वेदव्यासमहर्षिणा स एव चतुर्धा विभक्तः। वेदभाषा अत्यन्तप्राचीना, अवगाहनदुर्लभा च। वेदमन्त्राणा-मुच्चारणमपि कष्टसाध्यमेव। अत एव वेदः सर्वेषां दुर्लभः। इमां वेदविद्यां प्रजाभ्यः प्रदातुं महर्षयः शास्त्रग्रन्थानलिखन्। एतानि शास्त्राणि हिन्दूमतस्य द्वितीयप्रमाणानि।

कालक्रमेण सामान्यजनाः शास्त्राणि अवगन्तुं शक्तिहीनाः सञ्जाताः। अत एव व्यासमहर्षिः पुराणेषु भगवतः सृष्टि, तस्मिन् भगवतः लीलाविभूतयः अनादिकालादारभ्य देव, राक्षस, मानवानां तत्तत् साचिक, नैतिक, आध्यात्मिक जीवनगतयः च सविपुलं विवृणोत्। एतानि पुराणानि वैदिकमतस्य तृतीय प्रमाणानि।

इतिहासः चतुर्थं प्रमाणम् । इतिहासेन कश्चित् दिव्यपुरुषस्य अथवा दिव्यपुरुषोदितवंशस्य सम्पूर्ण चरितं वा ज्ञायते। रामायण, महाभारतादयः इतिहासाः इति कथ्यन्ते। रामायणग्रन्थकर्ता वाल्मीकिः। पञ्चमवेदाख्यस्य महाभारतस्य रचयिता वेदव्यासमहर्षिः। श्रीमद्रामायणेन श्रीरामचरितं ज्ञायते। तथैव श्रीमन्महाभारतेन सुप्रसिद्ध पाण्डवधार्तराष्ट्रादीनां चरितमवगम्यते ।

यः कोऽपि वा ग्रन्थः भवतु तस्य कर्तुः जीवितसारं प्रकटयति। तदनन्तरकाली-नानामवगमनार्थं ग्रन्थरूपं प्राप्नोति। एवं श्रीमन्महाभारते व्यास ग्रथिता भगवद्गीता। श्रीकृष्णभगवतः निवासस्थानम्। तथैव अय्यप्पगीता भगवतः अय्यप्पस्य निवासस्थानम् । अय्यप्पः अय्यप्पगीतायामेव निवसति, विलसति च।

सन्यासिनः, तत्पक्षावलम्बिनश्च गीतायां ज्ञानयोग एव प्रतिपादितः इति कथयन्ति। कर्मसन्न्यासं कृत्वा ज्ञानमेव साधयेदिति भगवतः उपदेशः इति सन्न्यासिनः उद्घोषयन्ति । युद्धविमुखस्य अर्जुनस्य कर्मयोगमुपदिशय युद्धोन्मुखीचकार श्रीकृष्णः इति केचन गीतायां भक्तियोग एव प्रधानभूतः इति अन्ये। ज्ञानिनः भक्तिः, निष्कामकर्म अङ्गभूते भवतः । भक्तस्य ज्ञान, कर्म अङ्गभूते । एवमेव कर्मयोगिनः भक्ति, ज्ञाने कर्मभूते भूत्वा विलसतः। मानवस्य मानवातीतदेवत्वमपि ज्ञानमापादयति, नियमबद्धः, धर्ममार्गावलम्बी मानवः उत्तमः। इतोऽपि दिव्यजीवितमार्गानुगामी देव एव। अत एव आध्यात्मिकाभिवृद्धेः सत्प्रवर्तनम् अत्यन्तावश्यकम्। तथैव भक्तिः अपि अत्यन्तावश्यकी ।

एतादृश भक्तिसाधनमपि श्रवणादिभेदेन नवविधम् । तदुक्तम् -

**"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।**

**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।।" इति ।।[2]**

(1) तत्र श्रवणं नाम सगुणस्य निर्गुणस्य वा भगवतः शब्दादवगतिः तादृश शब्दस्य श्रोत्रेण गहणं च । (2) सगुणस्य निर्गुणस्य वा बोधकशब्दस्योच्चारणं कीर्तनम्।(3) "स चैवंगुणः" इत्याकारिक स्मृतिः स्मरणम्।(4) अय्यप्पप्रतिमादिपादसम्बन्धिगृहलेपनादिकम्, अय्यप्प-भक्तानां पादसंवाहनादि च पादसेवनम्। (5) अय्यप्पप्रतिमादौ गन्धपुष्पाद्यर्पणरूपो अय्यप्पप्रीतिहेतुः श्रवणादिभिन्नो व्यापारः अर्चनम्।(6) अय्यप्पप्रतिमादेरय्यप्पभक्तानां च पूजाबहिर्भूतन-मस्कारो वन्दनम् । (7) दासस्येव अय्यप्पप्रीतिफलकत्वेन तस्मिन् सकलकर्मार्पणं दास्यम् । (8) विश्वासो मित्रवृत्तिश्च सख्यम् । तत्राद्यः "न मे भक्तः प्रणश्यति" इत्यादिं भगवद्वाक्यविषयकः । द्वितीया तु बन्धुभावेन हिताशंसनरूपा। (9) स्वस्वीयदेहादि सङ्घातस्य भगवदेकभजनार्थं भगवत्यर्पणं आत्मनिवेदनम् ।

एवं भगवद्दुणतत्कथाश्रवण-तत्कीर्तन-तत्स्मरण-तदीयालयादिशो-धन-तद्भक्तपादवाहन-तदर्चन-तद्वन्दन-तद्दासस्य-तदात्मनिवेदनरूप-नवविधभक्त्या भगवत्परमात्मापादितस्य मनसः सर्वदा स्थिरतया तदाकारतैव परमभक्तिः ।

इयं च भक्तिर्योगादिसाधनेभ्यो विशिष्यते । तदुक्तं भगवते-

**नो साधयति मां योगो न साङ्ख्यं धर्म उद्धव ।**

**न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ।।[3]इति ।।**

गीतायाञ्च - न वेदयज्ञाध्ययनैर्नदानः न च क्रियाभिर्न तपोभिरुग्रैः[4] इत्यादिना वेदाध्ययनादीनां भगवद्दर्शनसाधनमपोद्य "भक्त्यात्व-नन्यया शक्यः",[5] "भक्त्या मामभिजानाति"[6] इत्यादिना तद्दर्शन भक्तेः परमोपायता निरूपिता। इयं च पर्यवसानतो ज्ञाने परिसमाप्यते ।

**सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।**

**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।।[7]**

इति भगवतः वचनमनुसृत्य मोक्षसाधनभूत भगवतश्शरणागतिः भक्तानां सुलभोपायः । तथैव -

**येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।**

**तेऽपि मामेव कौन्तेय ! यजन्त्यविधिपूर्वकम् ।।[8]**

इति अस्मिन् श्लोके श्रीकृष्ण भगवतः सनातन धर्मस्य निरुपमानं, अन्यमतदुर्लभम्, अतिविशालम् आध्यात्मिक दृक्पथं विस्पष्टं ज्ञायते ।

विष्णुसहस्रनाम्नि "विष्णुः" इति नाम अस्ति विवेश व्यानोतीति विष्णुः। "विष्तृव्यामी" इत्यस्मात् धातोः "दाभाव्यां नु (उमा 317) इत्यधिकारे "विणेः किच्च" (उणा.319) इति नुप्रत्ययः किदित्यभिप्रेत्य विष्णुनाम निर्वति विवेष्टीति। "विश प्रवेशने' इत्यस्मात् बाहुलकानुप्रत्ययः कित्। पकारश्चान्तादेशः पृषोदरादित्वात्। पृषदरादित्व कल्पनामूलं तु-

**यस्माद्विष्टपदं सर्वं तस्य शक्त्या महात्मनः ।**

**तस्मादेवोच्यते विष्णुर्विशोर्थातोः प्रवेशनात् ।।[9]**

विष्णुपुराण निर्वचनेन विशेरिति ज्ञायते । स्वायम्भुवादि मन्वन्तरेषु पृथक्पृथक मनुर्मनुपुत्रदेवाः इन्द्रः, विष्णोः वामनादिरूपाश्च लोकरक्षणादिनिर्वाहकतया विवेश इति प्रवेशार्थकविशधातु-निष्पन्न विष्णु शब्देन उच्यते ।

**एवमेव विष्णुसहस्रनाम्नि "सर्वश्शर्वश्शिवः" (वि.स.ना. 4)**

इत्यादि नामभिः भगवान् कीर्तितः । शृणातिहिनस्ति सर्वाः प्रजाः संहार काल समय इति शर्वः। "शृ हिंसायाम्" इत्यस्मात् "कृगृशृ धृभ्योः वः" (उणा. 153) इति वप्रत्यय इति शर्वनाम निर्वक्ति शृणातीति। "विष्णुः नारायणः, कृष्णोः वैकुण्ठो विष्टरश्रवाः' न इत्यादि नामभिः विष्णः हरिरिति अपरं नाम। तथैव "ईश्वरश्शर्वईशानः शङ्करश्चन्द्रशेखरः" इत्यादि अमरकोशोक्त नामभिः शर्वः हरः इति च ज्ञायते। अतः

हरिहरको पुत्र अयप्प तयोः समैक्यताम् अथवा एकत्वमापादयन्

अद्वैततत्वं नोधयति। "आकाशात्पतितं तोयं यथा गच्छति सागरम्। सर्वदेव नमस्कारः केशवं प्रतिगच्छति इति अद्वैतमतानुसारिणामभिप्रायः। तथैव "शिवाय विष्णुरूपाय शिवरूपाय विष्णवे शिवस्य हृदयं विष्णुः विष्णोश्च हृदयं शिवः यथा शिवमयो विष्णुरेवं विष्णुमयश्शिवः" इत्यादिभिः श्लोकै श्च शिवकेशक्योरमेदाध्यवसायि अद्वैततत्त्वम् उद्घोष्यते। व्यासमहर्षिणा ग्रथिता भगवद्गीता अद्वैतामृतवर्षिणी। अत्र भगवान् वासुदेवः कीर्त्यते। अधुना आधुनिक महर्षिणा तत्र जवत्ता स्वामी अच्युतानन्द महाभागेन ग्रथिता श्रीमदय्यप्पगीता अपि अद्वैतामृतवर्षिणी एव। यतः भगवतः अपरावतारः हरिहरयोः समाहाररूपः श्रीमदय्यप्पः अत्र कीर्त्यते। इतोऽपि भगवद्गीतायां कृष्णार्जुन संवादः अर्जुनाय भगवतः उपदेशः यथा सर्वेभ्यः उपदेशः भूत्वा विराजते तथैव अस्याम् अय्यप्पगीतायां शबरी अय्यप्पयोश्च संवादः, शव श्रीमदव्यस्योपदेशः लोकहिताय विराजते ।

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।।[10]**

इति भगवतः वचनात् भगवान् अय्यप्प अवतारेण उद्भूतः, तस्य कीर्तनमपि "श्रीमदयष्यगीता" नाम्ना सञ्जाता ।

**श्रीमदय्यप्पगीतायाः वैशिष्ट्यम्**

अनुभवे सत्यं दृष्ट्वा तत्फलितानुभूतिरेव मानवजीवितपरमलक्ष्यम् । भारतदेशः सनातनः । प्रजाः सनातनाः । एतेषां मतं च सनातनधर्मः। प्रतियुगं भारतीयानां वेदाः एवं मूलमन्त्राः । अस्माकं भारतदेशः कर्मभूमिरिति, पुण्यभूमिरिति, रत्नगर्भा इति च विश्वविख्यातिमाप्नोति। एतादृशे भारतदेशे अवतारपुरुषाः, महात्मानः, ऋषयः, योगिनः अनेके अजायन्त । शक्तिः, औन्नत्यं, साधुत्वं, सहनस्वभावः, पवित्रता, सनातनधर्माः इत्यादयः गुणाः अस्य देशस्य प्राणभूताः। क्वचिदेते अन्धकारबन्धुराः भवन्ति । तस्मिन् समये वेदाः अस्मान् संरक्षन्ति ।

ऋग्यजुस्सामाधर्वण नामभिः चतुर्वेदाः अजायन्त । तान् च क्रमशः अग्निः, वायुः, सूर्यः, अङ्गिराः इति चतुर्षु पवित्रमहर्षिषु भगवानाविश्चकार । इन्द्रः, मित्रः, वरुणः, मातरिश्वा, सुपर्णा इत्यादि भगवतः नामानि तस्य नानाविधशक्तीः, गुणगणांश्च व्यक्तीकुर्वन्ति। एक एव परमात्मा एतैः भिन्नभिन्ननामभिः कथ्यते ।

**"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यस्ससुपर्णो गरुत्मान् ।**
**एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानयमाहुः ।।**[11]

वेदेषूक्त परमात्मा एक एव । भगवच्छक्तिरपि एका एव । सा दिव्या, भव्या च। स्वरूप एवं ओङ्कारः । तमेव सृष्टिकर्तारं परमेश्वरं वदन्ति। विविधैः नामभिः सूचितेषु देवेषु उच्चनीचादि भेदाः न विद्यन्ते। एतेषां नामभिः ब्रह्मा एक एव कीर्त्यते । अत एव-

**हिरण्यगर्भः समवर्तताग्रे, भूतस्य जातः पतिरेक आसीत् ।**
**सदाधार पृथ्वीं द्यामुते मां, कस्मै देवाय हविषा विधेम ।।[12]**

इति ऋग्वेदोक्तिः। यः स्वप्रकाशरूपः, सूर्यचन्द्रधारी, सर्वभूतसृष्टिकर्ता, अद्वितीय चेतनास्वरूपः, समस्त जगतः आद्यः तं भगवन्तं वयं श्रद्धाभक्तिभ्याम् आराधयामः। इन्द्र, यम, अग्नि वाय्वादि नामभिः महर्षयः ब्रह्माणं कीर्तयन्ति। स एव ब्रह्मा ओमिति कथ्यते । तस्मादेव ओमित्येकाक्षरं ब्रह्म इति व्याहरन्ति । तदेव -

**नित्यमेकाक्षरं योगी व्याहरं ब्रह्मचोमिति ।**
**तदर्थं च हृदि ध्यायन् प्रायणे परमं पदम् ।।[13]**

इति अय्यप्पेन शबरीं प्रत्युपदिष्टः ।

**ऋग ऋग्विरेतं यजुर्भिरन्तरिक्षं**
**सामभिर्यत्तत्कवयो वेदयन्ते ।**
**तमोङ्कारेणैवायतनेनान्वेति विद्वान्**
**यत्तच्छान्तमजरममृतमभयं परञ्चेति ।।[14]**

ऋग्वेदात् (अकारमात्रज्ञानात्) भूलोको सत्यज्ञानी भवति । यजुर्वेदात् (उकारमात्र ज्ञानात्) अन्तरिक्षं ज्ञायते। सामवेदात् (मकारमात्र--ज्ञानात्) विज्ञानिनः ज्ञातलोकं प्राप्नुवन्ति। ज्ञानिभिः ओंकाराश्रयणात् शान्तः, अजरामरलोकः प्राप्यते इति प्रश्नोपनिषदा ज्ञायते । तथैव कठोपनिषदि -

**सर्वे वेदा यत्पदमामनन्ति**
**तपाग्सि सर्वाणि च यद्वदन्ति ।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति**
**तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत् ।।[15]**

इति यमः नचिकेतसे उपदिशति । "समस्तवेदाः यत्पदं वर्णयन्ति, समस्त तपांसि यं प्रासुं वदन्ति, मुमुक्षवः यदिच्छन्ति ब्रह्मचर्यं चरन्ति, तत् पदं मया संक्षेपेण त्वदर्थम् उपदिष्टः । तदेव ओमिति" इति नचिकेतसे यमोपदेशः ।

"ओमिति ब्रह्म । ओमितीदं सर्वम्।
ओमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति ।
ओमिति सामानि गायन्ति । ओगूंशोमिति शस्त्राणि शग्सन्ति ।
ओमित्यध्वर्युः प्रतिगरं प्रतिगृह्णाति ।
ओमिति ब्रह्मा प्रसौति ओमित्यध्वर्युः प्रतिगरं प्रतिगृह्णाति ।
ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति ।
ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवनीति । ब्रह्मैवोपाप्नोति ।"[16]

इति तैत्तिरीयोपनिषदा ओङ्कारप्रभावः ज्ञायते। एतैः विषयैः ओंकारपूर्वकक्रियाः एव फलवत्यः भवेयुरिति ज्ञायते ।

ओमित्येकाक्षरप्रणवस्य मात्राविवरणे मात्रात्रयं विद्यते। ताः च क्रमशः अ+उ+म= ओम् इति । “सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति"[17] इति माण्डूक्योपनिषदा ओङ्कारः आत्मा इति ज्ञायते ।

**अहं त्वमिति निर्देशे द्वैतमेव प्रकाशते ।**
**सोऽहमित्यपि निर्देशे चाद्वैतं प्रतिपाद्यते ॥[18]**

इति शबरीं प्रत्युपदिशति सोऽहम्भावनामकाद्वैततत्त्वं श्रीमदय्यप्पः । नाहं देही । अहम् आत्मस्वरूपः । नाहं जीवी । नान्तःकरणोऽहम्। अहं केवलात्मस्वरूपः इत्यभिप्रायः यदा जायते तदा "अहं ब्रह्मास्मि" इति "अहं ओङ्कारः" इति, "सर्वं खल्विदं ब्रह्म" इति च ज्ञानम् आत्मनि सम्भवति । सः = अहम् = सोऽहम्, अर्थात् सः पदार्थः । तत्पदार्थं भगवन्नाम । तद्ब्रह्ममभिजानाति । एवञ्च -

**ब्रह्मभिन्नं जगन्नास्ति नास्ति जन्मजरामृतिः ।**
**सुखदुःखादिकं नास्ति अस्ति ब्रह्मनिरामयम् ।।[19]**

पूर्वोक्तरीत्या "ओमित्येकाक्षरं ब्रह्म" इत्युक्तवत् आत्मानं, ब्रह्माणञ्च ओङ्कारेणैव ध्यायेत् । इदमेव श्रीमदय्यप्पः शबरीप्रत्युपदिदेश। उपनिषदि उक्तविषयः उपदिष्टत्वात् श्रीमदय्यप्पगीता शास्त्रत्व-माप्नोति । तर्हि किं नाम शास्त्रम् ? इति सन्देहो जायते। तन्निरूप्यते तावत् - इह खल्वनाद्यविद्याविलसिते शीतोष्ण सुखदुःखादि बहुद्वन्द्वभूयिष्ठे जननमरणप्रवाहरूपे सच्चिदानन्दात्मक परब्रह्मज्ञानै-कनुिवर्त्य संसारे पुरुषैरभिलषणीया अर्थाश्चत्वारः। ते च धर्मार्थकाममोक्षाः। पुरुषैरर्थ्यमानत्वादिमे पुरुषार्था इत्युच्यन्ते। एष्वादिमानां त्रयाणां "त्रिवर्ग" इति, समुदितानां चतुर्वर्ग इति च "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः" इति रीत्या प्रचीनैस्समाख्या अकारि ।

एतेषु मोक्ष एव परमः पुरुषार्थः, "न स पुनरावर्तते" इत्यादि श्रुत्या तस्य नित्यतावगमात्। इतरेषां त्रयाणां प्रत्यक्षसिद्धेन कार्यत्वरूपलिङ्गेन "तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यकृतो लोकः क्षीयते" इत्यादिश्रुत्या च अनित्यात्वावगमादिति प्रासङ्गिकोऽयं विषयः ।

चतुर्विधानामेतेषां पुरुषार्थानां स्वरूपसाधनफलादि निरूपकाः श्रुतिस्मृतीतिहास पुरणादयो बहव उपाया दरीदृश्यन्ते । तेषु श्रुतयो नाम चत्वारो वेदाः, सोपनिषदः

सारण्यकाः सब्राह्मणा ऋग्यजुस्सामाधर्वणः। वेदार्थस्मरणपूर्वकं मन्वादिभिः विरचिताः स्मृतयः । वेदार्थोपबृंहकाः पुरावृत्तात्मका रामायण महाभारतादयः इतिहासाः। वेदार्थोपबृंहका एव वंशवंशानुचरित सर्गप्रतिसर्गमन्वन्तर वर्णनविशिष्टाः भागवतादयः पुराणानि। एवमेव यथाकथञ्चित् वेदोपकारकाणि शिक्षाव्याकरण-च्छन्दोनिरुक्त ज्यौतिष कल्पाख्यानि षडङ्गानि भासन्ते । एषु श्रुतयः अपौरुषेयाः, स्मृत्यादयः सर्वे पौरुषेयाः एव इति सम्प्रदायः। सर्वेषामेषामुपदेश शब्देन शास्त्र शब्देन च व्यवहारः दृश्यते। तदेव शासनाच्छास्त्रमित्युच्यते। शास्त्रमिति "शासु" (अनुशिष्टी) धातोः करणे ष्ट्रप्रत्यये सिध्यति । यत् कर्तव्याकर्तव्ययोः अन्यतरत् शास्ति पुरुषं, तच्छास्त्रमिति भावः । तदुक्तमभियुक्तैः –

**"प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेनवा ।**
**पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते"** ।। इति ।

कानि शास्त्राणि ? । शास्त्राणि प्रसिद्धव्यवहारगोचराणि षट् । तानि च व्याकरणपूर्व-मीमांसोत्तरमीमांसा सांख्यवैशेषिक न्यायनामकानि । एषामेव दर्शनपदेन व्यवहारोऽपि दृश्यते। साक्षात् पुरुषार्थसाधनो-पदेश स्वभाववद् वेदाविरोधिनं परम्परया पुरुषार्थ साधनोपदेश स्वभाववन्तं यं कमपि पूर्वमर्थ यद्बोधयति, तत्सर्वमपि शास्त्रमिति वक्तुं शक्यते ।

**उपसंहारः (Conclusion) -** श्रीमदय्यप्पगीता मानवमात्राय शान्तेः मुक्तेः च दिव्यसन्देशं ददाति । अस्य शोधपत्रस्य परिशीलनेन ज्ञायते यत् साम्प्रतिककाले यदा मानवाः भेदमार्गेण दुःखिताः सन्ति, तदा अय्यप्पगीतायाः 'हरिहर-ऐक्य' सन्देशः अतीव आवश्यकः अस्ति। एषा गीता उपनिषदां सारभूता अस्ति, यत्र ओंकारस्य ध्यानेन आत्मज्ञानस्य प्राप्तिः सुलभतया दर्शिता। अय्यप्पस्वामिनः 'शरणमय्यप्प' इति घोषः न केवलं मन्त्रः, अपितु भगवति पूर्णसमर्पणस्य प्रतीकः अस्ति । निष्कर्षतः, इयं गीता भक्तानां कृते ज्ञान-विज्ञान-वैराग्याणां संगमस्थलम् अस्ति, यस्याः पारायणं श्रवणं च परमश्रेयस्करं भवति ।

**सहायकग्रन्थसूची**


१) श्रीमदय्यप्पगीता, अच्युतानन्द स्वामी, राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः । १९९३ ।
२) श्रीमद्भगवद्गीता, महर्षि-वेदव्यासः, गीताप्रेस, गोरखपुर ।
३) श्रीमद्भागवतपुराणम्, महर्षि-वेदव्यासः, गीताप्रेस, गोरखपुर ।
४) दशोपनिषदः (शाङ्करभाष्यसहिताः), सम्पा. स्वामी गम्भीरानन्दः, अद्वैत आश्रम, कोलकाता ।
५) विष्णुसहस्रनामस्तोत्रम्, महर्षि-वेदव्यासः, गीताप्रेस, गोरखपुर ।
६) वुष्णुपुराणम्, गीताप्रेस, गोरखपुर ।
७) कठोपनिषत्, कोंपेल्ल दक्षिणामूर्त्तिसम्पादिता, सीताराम आदिशङ्कराचार्य ट्रष्ट, हैदराबाद, १९८४ ।
८) अमरकोशः, अमरसिंहः, चौखम्बा संस्कृत संस्थान, वाराणसी
९) वेदान्तसारः, सदानन्द योगीन्द्रः, रामकृष्ण मठ, नागपुर ।
१०)तैत्तिरीयोपनिषत्, रामकृष्णमठम्, मद्रास ।


**पाद टिप्पणी:**

1 श्रीमदय्यप्पगीता 17-18
2 श्रीमद्भागवतम् - 7-5-23
3 श्रीमद्भागवतम् - 11-14-10
4 श्रीमद्भगवद्गीता - 11-48
5 श्रीमद्भगवद्गीता - 11-54
6 श्रीमद्भगवद्गीता - 18-55
7 श्रीमद्भगवद्गीता - 18-66
8 श्रीमद्भगवद्गीता - 9-23
9 विष्णुपुराणम् - 3-1-45
10 श्रीमद्भगवद्गीता – 4/7
11 ऋग्वेदः-1-22-164-46
12 ऋग्वेदः - 10-121-1
13 श्रीमदय्यप्पगीता- 13-13
14 प्रश्नोपनिषत् - 5-7
15 कठोपनिषत् - 1-2-15
16 तैत्तिरीयोपनिषत् - 1-8-1
17 माण्डूक्योपनिषत् - 1-4
18 श्रीमदय्यप्पगीता - 3-2
19 श्रीमदय्यप्पगीता - 3-8